# Stavakalpadrumah

# સ્તવકલ્પદ્રુમઃ

## Document Information

Text title : Stavakalpadrumah

File name : stavakalpadrumaH.itx

Category : devii, devI, nadI

Location : doc_devii

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : December 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2019

*sanskritdocuments.org*

# Stavakalpadrumah

# સ્તવકલ્પદ્રુમઃ

શ્રીગણેશાય નમઃ ।

શ્રીગઙ્ગા-પ્રણામઃ

નવદ્વીપારામપ્રકરકુસુમામોદવલિતાં
    સ્ફુરદ્રત્નશ્રેણીચિત-તટ-સુતીર્થાવલિયુતામ્ ।
હરેગૌર્રરાઙ્ગસ્યાતુલ-ચરણ-રેણૂક્ષિત-તનું
    સમુદ્યત્-પ્રેમોર્મીતુમુલહરિસઙ્કીર્તન-રસૈઃ ॥ ૧॥

પ્રભુક્રીડાપાત્રીમમૃતરસગાત્રીમૃષિતટાં
    શિવબ્રહ્મેન્દ્રાદીડિત-મહિત-માહાત્મ્યમુખરામ્ ।
લસત્-કિઞ્જલ્કામ્ભોજનિ-મધુપ-ગર્ભોરુકરુણા
    મહં વન્દે ગઙ્ગામઘ-નિકર-ભઙ્ગાં જલકણામ્ ॥ ૨॥

સદ્યઃ પાતકસંહન્ત્રી સદ્યો દુઃખવિનાશિની ।
સુખદા મોક્ષદા ગઙ્ગા ગઙ્ગૈવ પરમા ગતિઃ ॥ ૩॥

શ્રીગઙ્ગાસ્નાનમન્ત્રઃ

વિષ્ણુપાદ-પ્રસૂતાઽસિ વૈષ્ણવી વિષ્ણુદેવતા ।
પાહિ નસ્ત્વેનસસ્તસ્માદાજન્મમરણાન્તિકાત્ ॥ ૧॥

શ્રીગઙ્ગાસ્તવઃ

ગઙ્ગે સમસ્તજગદમ્બ ચલત્તરઙ્ગેઽ
    નઙ્ગારિચારુતરમસ્તકપુષ્પમાલે ।
કંસારિચારુચરણદ્વયરેણુહર્ષિ
    ભક્ત્યા નમામિ દુરિતક્ષયકારિણિ ત્વામ્ ॥ ૧॥

માતઃ સમસ્તસુખદે પ્રવરે નદીનાં
    વ્યાસાદિવિપ્રચયગીતગુણે ગુણાઢ્યે ।
સંસારભૈરવમહાર્ણવમધ્યનૌકે
    વન્દે તવાઙ્ઘ્રિયુગલં દુરિતાપહારિ ॥ ૨॥

યસ્યાસ્તવામ્બુ કણિકામપિ જન્હુકન્યે !
    સૌદાસનામનૃપતિર્દ્વિજકોટિહન્તા ।
સંપ્રાપ્ય મુક્તિમગમત્ ત્રિદશૈરલભ્યાં
    તાં ત્વાં નમામિ શિરસા વરદે ! પ્રસીદ ॥ ૩॥

નારાયણાચ્યુતજનાર્દનકૃષ્ણરામ
    ગઙ્ગાદિનામ વદતો મમ દેવિ ! માતઃ ! ।
સંસારપાતકનિવારિણિ દેહપાત
    સ્ત્વદ્ધારિણીહ ભવતુ ત્વદનુગ્રહેણ ॥ ૪॥

કિંવા તપોભિરખિલેશ્વરિ ! કિં જપૈર્વા
    દાનૈશ્ચ કિં તુરગમેધમુખૈમખૈર્વા ।
ત્વન્નીરશીકરમવાપ્ય સુરૈરલભ્યાં
    મુક્તિં વ્રજન્તિ મનુજા અપિ પાપિનોઽપિ ॥ ૫॥

સ્વાહા ત્વમેવ પરમેશ્વરિ ! યા સ્વધા ત્વં
    ગીર્વાણવૃન્દપિતૃલોકસુતૃપ્તિહેતુઃ ।
સત્ત્વં રજસ્તમ ઇતિ ત્રિગુણસ્વરૂપા
    સૃષ્ટિસ્થિતિપ્રલયકારિણિ નૌમિ તાં ત્વામ્ ॥ ૬॥

ધત્તે લલાટફલકે તવ સૈકતં યઃ
    પુણ્ડ્રં ચ દેવિ તવ તીરમૃદા સદૈવ ।
ત્વન્નામ સર્વરસધામ વદેચ્ચ ભક્ત્યા
    તત્પાદરેણુરખિલોઽસ્તુ મમૈવ મૂર્ધ્નિ ॥ ૭॥

ઇતિ સ્તવકલ્પદ્રુમઃ શ્રીગઙ્ગા-પ્રણામઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Stavakalpadrumah*

pdf was typeset on December 7, 2019

Please send corrections to *sanskrit@cheerful.com*